# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्

# सत्रान्तपरीक्षा-ओक्टोम्बर्, २०१९(New)

| | | |
|---|---|---|
| **कक्षाः**- **शास्त्री-३**, (SEM-5) | **प्रश्नपत्रम् - ५** | **गुणाः - ७०** |
| **विषयः: सर्वदर्शनम्** | (C.C-3.5.9) | **समयः – ३ त: ६** |
| **दिनाङ्कः :१४-१०-२०१९** | **ग्रन्थः – वेदान्तपरिभाषा** | |

विभागः-१

प्रश्नः-१ निम्नलिखितेषु द्वयोः व्याख्यां कुरुत। (१०)

(१) यदविद्याविलासेन भूतभौतिकसृष्टयः।
तं नौमि परमात्मानं सच्चिदानन्दविग्रहम्॥

(२) संसर्गासङ्गि सम्यक् धी हेतुता या गिरामियम्।
उक्ताऽखण्डार्थता यद्वा तत्प्रातिपदिकार्थता॥

(३) चतुर्विधपुरुषार्थं प्रतिपाद्य मोक्षस्य परमपुरुषार्थत्वं प्रतिपादयत ।

प्रश्नः-२ निम्नलिखितयोः एकस्य निबन्धात्मकमुत्तरं लिखत। (१०)

(१) प्रमाण-प्रमयोर्लक्षणनिरूपणं यथाग्रन्थं निरूपयत।

(२) प्रत्यक्षप्रमाणस्य लक्षणभेदविचारं यथाग्रन्थं विचारयत।

विभागः-२

प्रश्नः-३ निम्नलिखितेषु द्वयोः व्याख्यां कुरुत। (१०)

(१) अनुमित्युत्पत्तिप्रकारं निरूपयत।

(२) प्रत्यक्षानुमानयोरविरोधं प्रतिपादयत ।

(३) भेदसहितम् अनुमानं व्याख्यात।

प्रश्नः-४ निम्नलिखितयोः एकस्य व्याख्यां विशदतया लिखत। (१०)

(१) त्रिविधसत्तां मिथ्यात्वलक्षणं च यथाग्रन्थं विवृणुत।

(२) व्याप्तिसंस्कारस्य करणत्वं व्याप्तेः स्वरूपं च यथाग्रन्थमुपपादयत।

विभागः-३

प्रश्नः-५ निम्नलिखितेषु द्वयोः व्याख्यां कुरुत। (१०)

(१) उपमानस्य प्रमाणान्तरत्वमुपपादयत।

(२) त्रिविधलक्षणाम् उपपादयत ।

(३) जातिशक्तिवादं निरूपयत।

प्रश्नः-६ निम्नलिखितयोः द्वयोः एकस्य व्याख्यां विशदतया लिखत। (१०)

(१) वेदाः नित्याः उत अनित्याः इति विचारं यथाग्रन्थं विचारयत।

(२) वाक्यजन्यज्ञानकारणानि प्रत्येकशः स्पष्टं विचारयत।

प्रश्नः-७ निम्नलिखितप्रश्नेषु दशप्रश्नानाम् अतिलघूत्तराणि लिखन्तु। (१०)

(१) किं नाम तात्पर्यम्?

(२) आसत्तिः कुत्र हेतुर्भवति?

(३) अजहल्लक्षणा का?

(४) अन्तःकरणावच्छिन्नचैतन्यं किम् ?

(५) किं नाम सविकल्पकप्रत्यक्षम्?

(६) किं नाम प्रमाणम्?

(७) पदार्थः कतिविधः? के च ते?

(८) जहदजहल्लक्षणोदाहरणं किम्?

(९) व्याप्तिः कथं गृह्यते?

(१०) कतिविधा वृत्तिः?

(११) किं नाम निर्विकल्पकम्?

(१२) श्रोत्रं किम्?

(१३) प्रकृतिः का?

(१४) योग्यता का?

(१५) वेदान्तपरिभाषायाः रचयिता कः?

★★★★★★★★★★

# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्

# सत्रान्तपरीक्षा - ओक्टोम्बर्, २०१९(New)

**कक्षाः**- **शास्त्री-३**, (SEM-5) **प्रश्नपत्रम् - ५** **गुणाः - ७०**

**विषयः: सर्वदर्शनम्** (C.C-3.5.9) **समयः -**

**दिनाङ्कः :** **ग्रन्थः – वेदान्तपरिभाषा**

---

## प्रश्नः - ७

## समाधानानि

१. तत्प्रतीतिजननयोग्यत्वं तात्पर्यम्।

२. शाब्दबोधे।

३. यत्र शक्यार्थमन्तर्भाव्यैवार्थान्तरप्रतीतिः सा।

४. जीवस्य।

५. वैशिष्ट्यावगाहिज्ञानं सविकल्पकम्।

६. प्रमाकरणं प्रमाणम्।

७. द्विविधः, शक्यो लक्ष्यश्चेति।

८. काकेभ्यो दधि रक्ष्यताम्।

९. व्यभिचारादर्शने सति सहचारदर्शनेन गृह्यते।

१०. वृत्तिश्चतुर्विधा।

११. संसर्गानवगाहि ज्ञानम्।

१२. कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रम्।

१३. मायां तु प्रकृतिं विद्यात्।

१४. तात्पर्यविषयीभूतसंसर्गाबाधः।

१५. श्रीधर्मराजाध्वरीन्द्रः।